# Shri Rama SahasranAma Stotra

# શ્રીરામસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : rAmasahasranAmastotram 3

File name : rAmasahasranAmastotram3.itx

Category : raama, sahasranAma

Location : doc_raama

Proofread by : PSA Easwaran

Latest update : June 21, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીરામસહસ્રનામસ્તોત્રમ્

(અકારાદિજ્ઞકારાન્ત)

॥ શ્રીઃ ॥

સઙ્કલ્પઃ -
યજમાનઃ, આચમ્ય, પ્રાણાનાયમ્ય, હસ્તે જલાઽક્ષતપુષ્પદ્રવ્યાણ્યાદાય,
અદ્યેત્યાદિ-માસ-પક્ષાદ્યુચ્ચાર્ય એવં સઙ્કલ્પં કુર્યાત્ ।
શુભપુણ્યતિથૌ અમુકપ્રવરસ્ય અમુકગોત્રસ્ય અમુકનામ્નો મમ
યજમાનસ્ય સકુટુમ્બસ્ય શ્રુતિસ્મૃતિપુરાણોક્તફલપ્રાપ્ત્યર્થં
ત્રિવિધતાપોપશમનાર્થં સકલમનોરથસિદ્ધ્યર્થં
શ્રીસીતારામચન્દ્રપ્રીત્યર્થં ચ શ્રીરામસહસ્રનામસ્તોત્રપાઠં
કરિષ્યે । અથવા કૌશલ્યાનન્દવર્દ્ધનસ્ય
શ્રીભરતલક્ષ્મણાગ્રજસ્ય સ્વમતાભીષ્ટસિદ્ધિદસ્ય શ્રીસીતાસહિતસ્ય
મર્યાદાપુરુષોત્તમશ્રીરામચન્દ્રસ્ય સહસ્રનામભિઃ શ્રીરામનામાઙ્કિત-
તુલસીદલસમર્પણસહિતં પૂજનમહં કરિષ્યે । અથવા સહસ્રનમસ્કારાન્
કરિષ્યે ॥

વિનિયોગઃ -
ૐ અસ્ય શ્રીરામચન્દ્રસહસ્રનામસ્તોત્રમન્ત્રસ્ય ભગવાન્ શિવ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રીરામસીતાલક્ષ્મણા દેવતાઃ,
ચતુર્વર્ગફલપ્રાપ્ત્યયર્થં પાઠે (તુલસીદલસમર્પણે, પૂજાયાં
નમસ્કારેષુ વા) વિનિયોગઃ ॥

કરન્યાસઃ -
શ્રીરામચન્દ્રાય, અઙ્ગુષ્ઠાભ્યાં નમઃ ।
શ્રીસીતાપતયે, તર્જનીભ્યાં નમઃ ।
શ્રીરઘુનાથાય, મધ્યમાભ્યાં નમઃ ।
શ્રીભરતાગ્રજાય, અનામિકાભ્યાં નમઃ ।

શ્રીદશરથાત્મજાય, કનિષ્ઠિકાભ્યાં નમઃ ।
શ્રીહનુમત્પ્રભવે, કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -
શ્રીરામચન્દ્રાય, હૃદયાય નમઃ ।
શ્રીસીતાપતયે, શિરસે સ્વાહા ।
શ્રીરઘુનાથાય શિખાયૈ વષટ્ ।
શ્રીભરતાગ્રજાય કવચાય હુમ્ ।
શ્રીદશરથાત્મજાય નેત્રત્રયાય વૌષટ્ ।
શ્રીહનુમત્પ્રભવે, અસ્ત્રાય ફટ્ ॥

ધ્યાનમ્ -
ધ્યાયેદાજાનુબાહું ધૃતશરધનુષં બદ્ધપદ્માસનસ્થં
પીતં વાસો વસાનં નવકમલદલસ્પર્ધિનેત્રં પ્રસન્નમ્ ।
વામાઙ્કારૂઢસીતામુખકમલમિલલ્લોચનં નીરદાભં
નાનાલઙ્કારદીપ્તં દધતમુરુજટામણ્ડનં રામચન્દ્રમ્ ॥ ૧॥ var મણ્ડલં
નમોઽસ્તુ રામાય સલક્ષ્મણાય દેવ્યૈ ચ તસ્યૈ જનકાત્મજાયૈ ।
નમોઽસ્તુ રુદ્રેન્દ્રયમાનિલેભ્યો નમોઽસ્તુ ચન્દ્રાર્કમરુદ્ગણેભ્યઃ ॥ ૨॥

માનસ-પઞ્ચોપચાર-પૂજનમ્-
૧ ૐ લં પૃથિવ્યાત્મને ગન્ધં પરિકલ્પયામિ ।
૨ ૐ હં આકાશાત્મને પુષ્પં પરિકલ્પયામિ ।
૩ ૐ યં વાય્વાત્મને ધૂપં પરિકલ્પયામિ ।
૪ ૐ રં વહ્ન્યાત્મને દીપં પરિકલ્પયામિ ।
૫ ૐ વં અમૃતાત્મને નૈવેદ્યં પરિકલ્પયામિ ।

અથ શ્રીરામસહસ્રનામસ્તોત્રમ્ ।
ૐ અનાદિરધિવાસશ્ચાચ્યુત આધાર એવ ચ ।
આત્મપ્રચાલકશ્ચાદિરાત્મભુઙ્નામકસ્તથા ॥ ૧॥

ઇચ્છાચારીભબન્ધારીડાનાડીશ્વર એવ ચ ।
ઇન્દ્રિયેશશ્ચેશ્વરશ્ચ તથા ચેતિવિનાશકઃ ॥ ૨॥

ઉમાપ્રિય ઉદારજ્ઞ ઉમોત્સાહસ્તથૈવ ચ ।
ઉત્સાહ ઉત્કટશ્ચૈવ ઉદ્યમપ્રિય એવ ચ ॥ ૩॥

ઊધાબ્ધિદાનકર્તા ચ ઊનસત્ત્વબલપ્રદઃ ।

ઋણમુક્તિકરશ્ચાથ ઋણદુઃખવિમોચકઃ ॥ ૪॥

એકપત્નિશ્ચૈકબાણધૃટ્ તથા ચૈન્દ્રજાલિકઃ ।
ઐશ્વર્યભોક્તા ઐશ્વર્યમોષધીનાં રસપ્રદઃ ॥ ૫॥

ઓણ્ડ્રપુષ્પાભિલાષી ચૌત્તાનપાદિસુખપ્રિયઃ ।
ઔદાર્યગુણસમ્પન્ન ઔદરશ્ચૌષધસ્તથા ॥ ૬॥

અંશાંશિભાવસમ્પન્નશ્ચાંસી ચાઙ્કુરપૂરકઃ ।
કાકુત્સ્થઃ કમલાનાથઃ કોદણ્ડી કામનાશનઃ ॥ ૭॥

કાર્મુકી કાનનસ્થશ્ચ કૌસલ્યાનન્દવર્ધનઃ ।
કોદણ્ડભઞ્જનઃ કાકધ્વંસી કાર્મુકભઞ્જનઃ ॥ ૮॥

કામારિપૂજકઃ કર્તા કર્બૂરકુલનાશનઃ ।
કબન્ધારિઃ ક્રતુત્રાતા કૌશિકાહ્લાદકારકઃ ॥ ૯॥

કાકપક્ષધરઃ કૃષ્ણઃ કૃષ્ણોત્પલદલપ્રભઃ ।
કઞ્જનેત્રઃ કૃપામૂર્તિઃ કુમ્ભકર્ણવિદારણઃ ॥ ૧૦॥

કપિમિત્રં કપિત્રાતા કપિકાલઃ કપીશ્વરઃ ।
કૃતસત્યઃ કલાભોગી કલાનાથમુખચ્છવિઃ ॥ ૧૧॥

કાનની કામિનીસઙ્ગી કુશતાતઃ કુશાસનઃ ।
કૈકેયીકીર્તિસંહર્તા કૃપાસિન્ધુઃ કૃપામયઃ ॥ ૧૨॥

કુમારઃ કુકુરત્રાતા કરુણામયવિગ્રહઃ ।
કારુણ્યં કુમૂદાનન્દઃ કૌસલ્યાગર્ભસેવનઃ ॥ ૧૩॥

કન્દર્પનિન્દિતાઙ્ગઃશ્ચ કોટિચન્દ્રનિભાનનઃ ।
કમલાપૂજિતઃ કામઃ કમલાપરિસેવિતઃ ॥ ૧૪॥

કૌસલ્યેયઃ કૃપાધાતા કલ્પદ્રુમનિષેવિતઃ ।
ખડ્ગહસ્તઃ ખરધ્વંસી ખરસૈન્યવિદારણઃ ॥ ૧૫॥

ખરપુત્રપ્રાણહર્તા ખણ્ડિતાસુરજીવનઃ ।
ખલાન્તકઃ ખસ્થવિરઃ ખણ્ડિતેશધનુસ્તથા ॥ ૧૬॥

ખેદી ખેદહરઃ ખેદદાયકઃ ખેદવારણઃ ।
ખેદહા ખરહા ચૈવ ખડ્ગી ક્ષિપ્રપ્રસાદનઃ ॥ ૧૭॥

ખેલત્ખઞ્જનનેત્રશ્ચ ખેલત્સરસિજાનનઃ ।
ખગચક્ષુસુનાસશ્ચ ખઞ્જનેશસુલોચનઃ ॥ ૧૮॥

ખઞ્જરીટપતિઃ ખઞ્જઃ ખઞ્જરીટવિચઞ્ચલઃ ।
ગુણાકરો ગુણાનન્દો ગઞ્જિતેશધનુસ્તથા ॥ ૧૯॥

ગુણસિન્ધુર્ગયાવાસી ગયાક્ષેત્રપ્રકાશકઃ ।
ગુહમિત્રં ગુહત્રાતા ગુહપૂજ્યો ગુહેશ્વરઃ ॥ ૨૦॥

ગુરુગૌરવકર્તા ચ ગરુગૌરવરક્ષકઃ ।
ગુણી ગુણપ્રિયો ગીતો ગર્ગાશ્રમનિષેવકઃ ॥ ૨૧॥

ગવેશો ગવયત્રાતા ગવાક્ષામોદદાયકઃ ।
ગન્ધમાદનપૂજ્યશ્ચ ગન્ધમાદનસેવિતઃ ॥ ૨૨॥

ગૌરભાર્યો ગુરુત્રાતા ગરુયજ્ઞાધિપાલકઃ ।
ગોદાવરીતીરવાસી ગઙ્ગાસ્નાતો ગણાધિપઃ ॥ ૨૩॥

ગરુત્મતરથી ગુર્વી ગુણાત્મા ચ ગુણેશ્વરઃ ॥

ગરુડી ગણ્ડકીવાસી ગણ્ડકીતીરચારણઃ ॥ ૨૪॥

ગર્ભવાસનિયન્તાऽથ ગુરુસેવાપરાયણઃ ।
ગીષ્પતિસ્તૂયમાનસ્તુ ગીર્વાણત્રાણકારકઃ ॥ ૨૫॥

ગૌરીશપૂજકો ગૌરીહૃદયાનન્દવર્ધનઃ ।
ગીતપ્રિયો ગીતરતસ્તથા ગીર્વાણવન્દિતઃ ॥ ૨૬॥

ઘનશ્યામો ઘનાનન્દો ઘોરરાક્ષસઘાતકઃ ।
ઘનવિઘ્નવિનાશો વૈ ઘનાનન્દવિનાશકઃ ॥ ૨૭॥

ઘનાનન્દો ઘનાનાદી ઘનગર્જિનિવારણઃ ।
ઘોરકાનનવાસી ચ ઘોરશસ્ત્રવિનાશકઃ ॥ ૨૮॥

ઘોરબાણધરો ઘોરધન્વી ઘોરપરાક્રમઃ ।
ઘર્મબિન્દુમુખશ્રીમાન્ ઘર્મબિન્દુવિભૂષિતઃ ॥ ૨૯॥

ઘોરમારીચહર્તા ચ ઘોરવીરવિઘાતકઃ ।
ચન્દ્રવક્ત્રશ્ચઞ્ચલાક્ષશ્ચન્દ્રમૂર્તિશ્ચતુષ્કલઃ ॥ ૩૦॥

ચન્દ્રકાન્તિશ્ચકોરાક્ષશ્ચકોરીનયનપ્રિયઃ ।

ચણ્ડવાણશ્ચણ્ડધન્વા ચકોરીપ્રિયદર્શનઃ ॥ ૩૧॥

ચતુરશ્ચાતુરીયુક્તશ્ચાતુરીચિત્તચોરકઃ ।
ચલત્ખડ્ગશ્ચલદ્બાણશ્ચતુરઙ્ગબલાન્વિતઃ ॥ ૩૨॥

ચારુનેત્રશ્ચારુવક્ત્રશ્ચારુહાસપ્રિયસ્તથા ।
ચિન્તામણિવિભૂષાઙ્ગશ્ચિન્તામણિમનોરથી ॥ ૩૩॥

ચિન્તામણિસુદીપશ્ચ ચિન્તામણિમણિપ્રિયઃ ।
ચિત્તહર્તા ચિત્તરૂપી ચલચ્ચિત્તશ્ચિતાઞ્ચિતઃ ॥ ૩૪॥

ચરાચરભયત્રાતા ચરાચરમનોહરઃ ।
ચતુર્વેદમયશ્ચિન્ત્યશ્ચિન્તાસાગરવારણઃ ॥ ૩૫॥

ચણ્ડકોદણ્ડધારી ચ ચણ્ડકોદણ્ડખણ્ડનઃ ।
ચણ્ડપ્રતાપયુક્તશ્ચ ચણ્ડેષુશ્ચણ્ડવિક્રમઃ ॥ ૩૬॥

ચતુર્વિક્રમયુક્તશ્ચ ચતુરઙ્ગબલાપહઃ ।
ચતુરાનનપૂજ્યશ્ચ ચતુઃસાગરશાસિતા ॥ ૩૭॥

ચમૂનાથશ્ચમૂભર્તા ચમૂપૂજ્યશ્ચમૂયુતઃ ।
ચમૂહર્તા ચમૂભઞ્જી ચમૂતેજોવિનાશકઃ ॥ ૩૮॥

ચામરી ચારુચરણશ્ચરણારુણશોભનઃ ।
ચર્મી ચર્મપ્રિયશ્ચારુમૃગચર્મવિભૂષિતઃ ॥ ૩૯॥

ચિદ્રૂપી ચ ચિદાનન્દશ્ચિત્સ્વરૂપી ચરાચરઃ ।
છત્રરૂપી છત્રસઙ્ગી છાત્રવૃન્દવિભૂષિતઃ ॥ ૪૦॥

છાત્રશ્છત્રપ્રિયશ્છત્રી છત્રમોહાર્તપાલકઃ ।
છત્રચામરયુક્તશ્ચ છત્રચામરમણ્ડિતઃ ॥ ૪૧॥

છત્રચામરહર્તા ચ છત્રચામરદાયકઃ ।
છત્રધારી છત્રહર્તા છત્રત્યાગી ચ છત્રદઃ ॥ ૪૨॥

છત્રરૂપી છલત્યાગી છલાત્મા છલવિગ્રહઃ ।
છિદ્રહર્ત્તા છિદ્રરૂપી છિદ્રૌઘવિનિષૂદનઃ ॥ ૪૩॥

છિન્નશત્રુશ્છિન્નરોગશ્છિન્નધન્વા છલાપહઃ ।
છિન્નછત્રપ્રદાતા ચ છન્દશ્ચારી છલાપહા ॥ ૪૪॥

જાનકીશો જિતામિત્રો જાનકીહૃદયપ્રિયઃ ।
જાનકીપાલકો જેતા જિતશત્રુર્જિતાસુરઃ ॥ ૪૫॥

જાનક્યુદ્ધારકો જિષ્ણુર્જિતસિન્ધુર્જયપ્રદઃ ।
જાનકીજીવનાનન્દો જાનકીપ્રાણવલ્લભઃ ॥ ૪૬॥

જાનકીપ્રાણભર્તા ચ જાનકીદૃષ્ટિમોહનઃ ।
જાનકીચિત્તહર્તા ચ જાનકીદુઃખભઞ્જનઃ ॥ ૪૭॥

જયદો જયકર્તા ચ જગદીશો જનાર્દનઃ ।
જનપ્રિયો જનાનન્દો જનપાલો જનોત્સુકઃ ॥ ૪૮॥

જિતેન્દ્રિયો જિતક્રોધો જીવેશો જીવનપ્રિયઃ ।
જટાયુમોક્ષદો જીવત્રાતા જીવનદાયકઃ ॥ ૪૯॥

જયન્તારિર્જાનકીશો જનકોત્સવદાયકઃ ।
જગત્ત્રાતા જગત્પાતા જગત્કર્તા જગત્પતિઃ ॥ ૫૦॥

જાડ્યહા જાડ્યહર્તા ચ જાડ્યેન્ધનહુતાશનઃ ।
જગત્સ્થિતિર્જગન્મૂર્તિર્જગતાં પાપનાશનઃ ॥ ૫૧॥

જગચ્ચિન્ત્યો જગદ્વન્દ્યો જગજ્જેતા જગત્પ્રભુઃ ।
જનકારિવિહર્તા ચ જગજ્જાડ્યવિનાશકઃ ॥ ૫૨॥

જટી જટિલરૂપશ્ચ જટાધારી જટાબહઃ ।
ઝર્ઝરપ્રિયવાદ્યશ્ચ ઝઞ્ઝાવાતનિવારકઃ ॥ ૫૩॥

ઝઞ્ઝારવસ્વનો ઝાન્તો ઝાર્ણો ઝાર્ણવભૂષિતઃ ।
ટઙ્કારિષ્ટઙ્કદાતા ચ ટીકાદૃષ્ટિસ્વરૂપધૃટ્ ॥ ૫૪॥

ઠકારવર્ણનિયમો ડમરુધ્વનિકારકઃ ।
ઢક્કાવાદ્યપ્રિયો ઢાર્ણો ઢક્કાવાદ્યમહોત્સવઃ ॥ ૫૫॥

તીર્થસેવી તીર્થવાસી તરુસ્તીર્થનિવાસકઃ ।
તાલભેત્તા તાલઘાતી તપોનિષ્ઠસ્તપઃ પ્રભુઃ ॥ ૫૬॥

તાપસાશ્રમસેવી ચ તપોધનસમાશ્રયઃ ।
તપોવનસ્થિતશ્ચૈવ તપસ્તાપસપૂજિતઃ ॥ ૫૭॥

તન્વીભાર્યસ્તનૂકર્તા ત્રૈલોક્યવશકારકઃ ।
ત્રિલોકીશસ્ત્રિગુણકસ્ત્રૈગુણ્યસ્ત્રિદિવેશ્વરઃ ॥ ૫૮॥

ત્રિદિવેશસ્ત્રિસર્ગેશસ્ત્રિમૂર્તિસ્ત્રિગુણાત્મકઃ ।
તન્ત્રરૂપસ્તન્ત્રવિજ્ઞસ્તન્ત્રવિજ્ઞાનદાયકઃ ॥ ૫૯ ॥

તારેશવદનોદ્યોતી તારેશમુખમણ્ડલઃ ।
ત્રિવિક્રમસ્ત્રિપાદૂર્ધ્વસ્ત્રિસ્વરસ્ત્રિપ્રવાહકઃ ॥ ૬૦ ॥

ત્રિપુરારિકૃતભક્તિશ્ચ ત્રિપુરારિપ્રપૂજિતઃ ।
ત્રિપુરેશસ્ત્રિસર્ગશ્ચ ત્રિવિધસ્ત્રિતનુસ્તથા ॥ ૬૧ ॥

તૂણી તૂણીરયુક્તશ્ચ તૂણબાણધરસ્તથા ।
તાટકાવધકર્તા ચ તાટકાપ્રાણઘાતકઃ ॥ ૬૨ ॥

તાટકાભયકર્તા ચ તાટકાદર્પનાશકઃ ।
થકારવર્ણનિયમસ્થકારપ્રિયદર્શનઃ ॥ ૬૩ ॥

દીનબન્ધુર્દયાસિન્ધુર્દારિદ્યાપદ્વિનાશકઃ ।
દયામયો દયામૂર્તિર્દયાસાગર એવ ચ ॥ ૬૪ ॥

દિવ્યમૂર્તિર્દિવ્યબાહુર્દીર્ઘનેત્રો દુરાસદઃ ।
દુરાધર્ષો દુરારાધ્યો દુર્મદો દુર્ગનાશનઃ ॥ ૬૫ ॥

દૈત્યારિર્દનુજેન્દ્રારિર્દાનવેન્દ્રવિનાશનઃ ।
દૂર્વાદલશ્યામમૂર્તિર્દૂર્વાદલઘનચ્છવિઃ ॥ ૬૬ ॥

દૂરદર્શી દીર્ઘદર્શી દુષ્ટારિબલહારકઃ ।
દશગ્રીવવધાકાઙ્ક્ષી દશકન્ધરનાશકઃ ॥ ૬૭ ॥

દૂર્વાદલશ્યામકાન્તો દૂર્વાદલસમપ્રભઃ ।
દાતા દાનપરો દિવ્યો દિવ્યસિંહાસનસ્થિતઃ ॥ ૬૮ ॥

દિવ્યદોલાસમાસીનો દિવ્યચામરમણ્ડિતઃ ।
દિવ્યચ્છત્રસમાયુક્તો દિવ્યાલઙ્કારમણ્ડિતઃ ॥ ૬૯ ॥

દિવ્યાઙ્ગનાપ્રમોદશ્ચ દિલીપાન્વયસમ્ભવઃ ।
દૂષણારિર્દિવ્યરૂપી દેવો દશરથાત્મજઃ ॥ ૭૦ ॥

દિવ્યદો દધિભુગ્ દાની દુઃખસાગરભઞ્જનઃ ।
દણ્ડી દણ્ડધરો દાન્તો દન્તુરો દનુજાપહઃ ॥ ૭૧ ॥

ધૈર્યં ધીરો ધરાનાથો ધનેશો ધરણીપતિઃ ।

ધન્વી ધનુષ્માન્ ધેનુષ્કો ધનુર્ભક્તા ધનાધિપઃ ॥ ૭૨॥

ધાર્મિકો ધર્મશીલશ્ચ ધર્મિષ્ઠો ધર્મપાલકઃ ।
ધર્મપાતા ધર્મયુક્તો ધર્મનિન્દકવર્જકઃ ॥ ૭૩॥

ધર્માત્મા ધરણીત્યાગી ધર્મયૂપો ધનાર્થદઃ ।
ધર્મારણ્યકૃતાવાસો ધર્મારણ્યનિષેવકઃ ॥ ૭૪॥

ધરોદ્ધર્તા ધરાવાસી ધૈર્યવાન્ ધરણીધરઃ ।
નારાયણો નરો નેતા નન્દિકેશ્વરપૂજિતઃ ॥ ૭૫॥

નાયકો નૃપતિર્નેતા નેયો નરપતિર્નટઃ ।
નટેશો નગરત્યાગી નન્દિગ્રામકૃતાશ્રમઃ ॥ ૭૬॥

નવીનેન્દુકલાકાન્તિર્નૌપતિર્નૃપતેઃ પતિઃ ।
નીલેશો નીલસન્તાપી નીલદેહો નલેશ્વરઃ ॥ ૭૭॥

નીલાઙ્ગો નીલમેઘાભો નીલાઞ્જનસમદ્યુતિઃ ।
નીલોત્પલદલપ્રખ્યો નીલોત્પલદલેક્ષણઃ ॥ ૭૮॥

નવીનકેતકીકુન્દો નૂત્નમાલાવિરાજિતઃ ।
નારીશો નાગરીપ્રાણો નીલબાહુર્નદી નદઃ ॥ ૭૯॥

નિદ્રાત્યાગી નિદ્રિતશ્ચ નિદ્રાલુર્નદબન્ધકઃ ।
નાદો નાદસ્વરૂપચ્ચ નાદાત્મા નાદમણ્ડિતઃ ॥ ૮૦॥

પૂર્ણાનન્દો પરબ્રહ્મ પરન્તેજાઃ પરાત્પરઃ ।
પરં ધામ પરં મૂર્તિઃ પરહંસઃ પરાવરઃ ॥ ૮૧॥

પૂર્ણઃ પૂર્ણોદરઃ પૂર્વઃ પૂર્ણારિવિનિષૂદનઃ ।
પ્રકાશઃ પ્રકટઃ પ્રાપ્યઃ પદ્મનેત્રઃ પરોત્કટઃ ॥ ૮૨॥

પૂર્ણબ્રહ્મ પૂર્ણમૂર્તિઃ પૂર્ણતેજાઃ પરંવપુઃ ।
પદ્મબાહુઃ પદ્મવક્ત્રઃ પઞ્ચાનનસુપૂજિતઃ ॥ ૮૩॥

પ્રપઞ્ચઃ પઞ્ચપૂતશ્ચ પઞ્ચામ્નાયઃ પરપ્રભૂઃ ।
પદ્મેશઃ પદ્મકોશશ્ચ પદ્માક્ષઃ પદ્મલોચનઃ ॥ ૮૪॥

પદ્માપતિઃ પુરાણશ્ચ પુરાણપુરુષઃ પ્રભુઃ ।
પયોધિશયનઃ પાલઃ પાલકઃ પૃથિવીપતિઃ ॥ ૮૫॥

પવનાત્મજવન્દ્યશ્ચ પવનાત્મજસેવિતઃ ।
પઞ્ચપ્રાણઃ પઞ્ચવાયુઃ પઞ્ચાઙ્ગઃ પઞ્ચસાયકઃ ॥ ૮૬॥

પઞ્ચબાણઃ પૂરકશ્ચ પ્રપઞ્ચનાશકઃ પ્રિયઃ ।
પાતાલં પ્રમથઃ પ્રૌઢઃ પાશી પ્રાર્થ્યઃ પ્રિયંવદઃ ॥ ૮૭॥

પ્રિયઙ્કુરઃ પણ્ડિતાત્મા પાપહા પાપનાશનઃ ।
પાણ્ડ્યેશઃ પૂર્ણશીલશ્ચ પદ્મી પદ્મસમર્ચિતઃ ॥ ૮૮॥

ફણીશઃ ફણિશાયી ચ ફણિપૂજ્યઃ ફણાન્વિતઃ ।
ફલમૂલપ્રભોક્તા ચ ફલદાતા ફલેશ્વરઃ ॥ ૮૯॥

ફણિરૂપઃ ફણેર્ભર્ત્તા ફણિભુગ્વાહનસ્તથા ।
ફલ્ગુતીર્થસદાસ્નાયી ફલ્ગુતીર્થપ્રકાશકઃ ॥ ૯૦॥

ફલાશી ફલદઃ ફુલ્લઃ ફલકઃ ફલભક્ષકઃ ।
બુધો બોધપ્રિયો બુદ્ધો બુદ્ધાચારનિવારકઃ ॥ ૯૧॥

બહુદો બલદો બ્રહ્મા બ્રહ્મણ્યો બ્રહ્મદાયકઃ ।
ભરતેશો ભારતીશો ભારદ્વાજપ્રપૂજિતઃ ॥ ૯૨॥

ભર્તા ચ ભગવાન્ ભોક્તા ભીતિઘ્નો ભયનાશનઃ ।
ભવો ભીતિહરો ભવ્યો ભૂપતિર્ભૂપવન્દિતઃ ॥ ૯૩॥

ભૂપાલો ભવનં ભોગી ભાવનો ભુવનપ્રિયઃ ।
ભારતારો ભારહર્તા ભારભૃદ્ભરતાગ્રજઃ ॥ ૯૪॥

ભૂર્ભુગ્ભુવનભર્તા ચ ભૂનાથો ભૂતિસુન્દરઃ ।
ભેદ્યો ભેદકરો ભેત્તા ભૂતાસુરવિનાશનઃ ॥ ૯૫॥

ભૂમિદો ભૂમિહર્તા ચ ભૂમિદાતા ચ ભૂમિપઃ ।
ભૂતેશો ભૂતનાથશ્ચ ભૂતેશપરિપૂજિતઃ ॥ ૯૬॥

ભૂધરો ભૂધરાધીશો ભૂધરાત્મા ભયાપહઃ ।
ભયદો ભયદાતા ચ ભયહર્તા ભયાવહઃ ॥ ૯૭॥

ભક્ષો ભક્ષ્યો ભવાનન્દો ભવમૂર્તિર્ભવોદયઃ ।
ભવાબ્ધિર્ભારતીનાથો ભરતો ભૂમિભૂધરૌ ॥ ૯૮॥

મારીચારિર્મરુત્ત્રાતા માધવો મધુસૂદનઃ ।
મન્દોદરીસ્તૂયમાનો મધુગદ્ગદભાષણઃ ॥ ૯૯॥

મન્દો મન્દારુમન્તારૌ મઙ્ગલં મતિદાયકઃ ।
માયી મારીચહન્તા ચ મદનો માતૃપાલકઃ ॥ ૧૦૦॥

મહામાયો મહાકાયો મહાતેજા મહાબલઃ ।
મહાબુદ્ધિર્મહાશક્તિર્મહાદર્પો મહાયશાઃ ॥ ૧૦૧॥

મહાત્મા માનનીયશ્ચ મૂર્તો મરકતચ્છવિઃ ।
મુરારિર્મકરાક્ષારિર્મત્તમાતઙ્ગવિક્રમઃ ॥ ૧૦૨॥

મધુકૈટભહન્તા ચ માતઙ્ગવનસેવિતઃ ।
મદનારિપ્રભુર્મત્તો માર્તણ્ડકુલભૂષણઃ ॥ ૧૦૩॥

મદો મદવિનાશી ચ મર્દનો મુનિપૂજકઃ ।
મુક્તિર્મરકતાભશ્ચ મહિમા મનનાશ્રયઃ ॥ ૧૦૪॥

મર્મજ્ઞો મર્મઘાતી ચ મન્દારકુસુમપ્રિયઃ ।
મન્દરસ્થો મુહૂર્તાત્મા મઙ્ગલ્યો મઙ્ગલાલકઃ ॥ ૧૦૫॥

મિહિરો મણ્ડલેશશ્ચ મન્યુર્માન્યો મહોદધિઃ ।
મારુતો મારુતેયશ્ચ મારુતીશો મરુત્તથા ॥ ૧૦૬॥

યશસ્યશ્ચ યશોરાશિર્યાદવો યદુનન્દનઃ ।
યશોદાહૃદયાનન્દો યશોદાતા યશોહરઃ ॥ ૧૦૭॥

યુદ્ધતેજા યુદ્ધકર્તા યોધો યુદ્ધસ્વરૂપકઃ ।
યોગો યોગીશ્વરો યોગી યોગેન્દ્રો યોગપાવનઃ ॥ ૧૦૮॥

યોગાત્મા યોગકર્તા ચ યોગભૃદ્યોગદાયકઃ ।
યોદ્ધા યોધગણાસઙ્ગી યોગકૃદ્યોગભૂષણઃ ॥ ૧૦૯॥

યુવા યુવતિભર્તા ચ યુવભ્રાતા યુવાર્જકઃ ।
રામભદ્રો રામચન્દ્રો રાઘવો રઘુનન્દનઃ ॥ ૧૧૦॥

રામો રાવણહન્તા ચ રાવણારી રમાપતિઃ ।
રજનીચરહન્તા ચ રાક્ષસીપ્રાણહારકઃ ॥ ૧૧૧॥

રક્તાક્ષો રક્તપદ્માક્ષો રમણો રાક્ષસાન્તકઃ ।
રાઘવેન્દ્રો રમાભર્તા રમેશો રક્તલોચનઃ ॥ ૧૧૨॥

રણરામો રણાસક્તો રણો રક્તો રણાત્મકઃ ।

રઙ્ગસ્થો રઙ્ગભૂમિસ્થો રઙ્ગશાયી રણાર્ગલઃ ॥ ૧૧૩॥

રેવાસ્નાયી રમાનાથો રણદર્પવિનાશનઃ ।
રાજરાજેશ્વરો રાજા રાજમણ્ડલમણ્ડિતઃ ॥ ૧૧૪॥

રાજ્યદો રાજ્યહર્તા ચ રમણીપ્રાણવલ્લભઃ ।
રાજ્યત્યાગી રાજ્યભોગી રસિકોઽથ રઘૂદ્વહઃ ॥ ૧૧૫॥

રાજેન્દ્રો રઘુનાયશ્ચ રક્ષોહા રાવણાન્તકઃ ।
લક્ષ્મીકાન્તશ્ચ લક્ષ્મીપો લક્ષ્મીશો લક્ષ્મણાગ્રજઃ ॥ ૧૧૬॥

લક્ષ્મણત્રાણકર્તા ચ લક્ષ્મણપ્રીતિપાલકઃ ।
લીલાવતારો લઙ્કારિર્લઙ્કેશો લક્ષ્મણેશ્વરઃ ॥ ૧૧૭॥

લક્ષ્મણત્રાણકશ્ચૈવ લક્ષ્મણપ્રતિપાલકઃ ।
લઙ્ગેશઘાતકશ્ચાથ લઙ્ગેશપ્રાણહારકઃ ॥ ૧૧૮॥

લઙ્કેશવીર્યહર્તા ચ લાક્ષારસવિલોચનઃ ।
લવઙ્ગકુસુમાસક્તો લવઙ્ગકુસુમપ્રિયઃ ॥ ૧૧૯॥

લલનાપાલનો લક્ષ્યો લિઙ્ગરૂપી લસત્તનુઃ ।
લાવણ્યરામો લાવણ્યં લક્ષ્મીનારાયણાત્મકઃ ॥ ૧૨૦॥

લવણામ્બુધિબન્ધશ્ચ લવણામ્બુધિસેતુકૃત્ ।
લીલામયો લવણજિત્ લોલો લવણજિત્પ્રિયઃ ॥ ૧૨૧॥

વસુધાપાલકો વિષ્ણુર્વિદ્વાન્ વિદ્વજ્જનપ્રિયઃ ।
વસુધેશો વાસુકીશો વરિષ્ઠો વરવાહનઃ ॥ ૧૨૨॥

વેદો વિશિષ્ટો વક્તા ચ વદાન્યો વરદો વિભુઃ ।
વિધિર્વિધાતા વાસિષ્ઠો વસિષ્ઠો વસુપાલકઃ ॥ ૧૨૩॥

વસુર્વસુમતીભર્તા વસુમાન્ વસુદાયકઃ ।
વાર્તાધારી વનસ્થશ્ચ વનવાસી વનાશ્રયઃ ॥ ૧૨૪॥

વિશ્વભર્તા વિશ્વપાતા વિશ્વનાથો વિભાવસુઃ ।
વિભુર્વિભુજ્યમાનશ્ચ વિભક્તો વધબન્ધનઃ ॥ ૧૨૫॥

વિવિક્તો વરદો વન્યો વિરક્તો વીરદર્પહા ।
વીરો વીરગુરુર્વીરદર્પધ્વંસી વિશામ્પતિઃ ॥ ૧૨૬॥

વાનરારિર્વાનરાત્મા વીરો વાનરપાલકઃ ।
વાહનો વાહનસ્થશ્ચ વનાશી વિશ્વકારકઃ ॥ ૧૨૭॥

વરેણ્યો વરદાતા ચ વરદો વરવઞ્ચકઃ ।
વસુદો વાસુદેવશ્ચ વસુર્વન્દનમેવ ચ ॥ ૧૨૮॥

વિદ્યાધરો વેદ્યવિન્ધ્યો તથા વિન્ધ્યાચલાશનઃ ।
વિદ્યાપ્રિયો વિશિષ્ટાત્મા વાદ્યભાણ્ડપ્રિયસ્તથા ॥ ૧૨૯॥

વન્દ્યશ્ચ વસુદેવશ્ચ વસુપ્રિયવસુપ્રદૌ ।
શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીપતિઃ શરણાશ્રયઃ ॥ ૧૩૦॥

શ્રીધરઃ શ્રીકરઃ શ્રીલઃ શરણ્યઃ શરણાત્મકઃ ।
શિવાર્જિતઃ શિવપ્રાણઃ શિવદઃ શિવપૂજકઃ ॥ ૧૩૧॥

શિવકૃત્ શિવહર્તા ચ શિવાત્મા શિવવાઞ્છકઃ ।
શાયકી શઙ્કરાત્મા ચ શઙ્કઃરાર્ચનતત્પરઃ ॥ ૧૩૨॥

શઙ્કરેશઃ શિશુઃ શૌરિઃ શાબ્દિકઃ શબ્દરૂપકઃ ।
શબ્દભેદી શબ્દહર્તા શાયકઃ શરણાર્તિહા ॥ ૧૩૩॥

શર્વઃ શર્વપ્રભુઃ શૂલી શૂલપાણિપ્રપૂજિતઃ ।
શાર્ઙ્ગી ચ શઙ્કરાત્મા ચ શિવઃ શકટભઞ્જનઃ ॥ ૧૩૪॥

શાન્તઃ શાન્તિઃ શાન્તિદાતા શાન્તિકૃત્ શાન્તિકારકઃ ।
શાન્તિકઃ શઙ્ખધારી ચ શઙ્ખી શઙ્ખધ્વનિપ્રિયઃ ॥ ૧૩૫॥

ષટ્ચક્રભેદનકરઃ ષડ્ગુણશ્ચ ષડૂર્મિકઃ ।
ષડિન્દ્રિયઃ ષડઙ્ગાત્મા ષોડશઃ ષોડશાત્મકઃ ॥ ૧૩૬॥

સ્ફુરત્કુણ્ડલહારાઢ્યઃ સ્ફુરન્મરકતચ્છવિઃ ।
સદાનન્દઃ સતીભર્તા સર્વેશઃ સજ્જનપ્રિયઃ ॥ ૧૩૭॥

સર્વાત્મા સર્વકર્તા ચ સર્વપાતા સનાતનઃ ।
સિદ્ધઃ સાધ્યઃ સાધકેન્દ્રઃ સાધકઃ સાધકપ્રિયઃ ॥ ૧૩૮॥

સિદ્ધેશઃ સિદ્ધિદઃ સાધુઃ સત્કર્તા વૈ સદીશ્વરઃ ।
સદ્ગતિઃ સચ્ચિદાનન્દઃ સદ્બ્રહ્મા સકલાત્મકઃ ॥ ૧૩૯॥

સતીપ્રિયઃ સતીભાર્યઃ સ્વાધ્યાયશ્ચ સતીપતિઃ ।
સત્કવિઃ સકલત્રાતા સર્વપાપપ્રમોચકઃ ॥ ૧૪૦॥

સર્વશાસ્ત્રમયઃ સૂર્યઃ સર્વામ્નાયનમસ્કૃતઃ ।
સર્વદેવમયઃ સાક્ષી સર્વયજ્ઞસ્વરૂપકઃ ॥ ૧૪૧॥

સર્વઃ સઙ્કટહર્તા ચ સાહસી સગુણાત્મકઃ ।
સુસ્નિગ્ધઃ સુખદાતા ચ સત્ત્વઃ સત્ત્વગુણાશ્રયઃ ॥ ૧૪૨॥

સત્યઃ સત્યવ્રતશ્ચૈવ સત્યવાન્ સત્યપાલકઃ ।
સત્યાત્મા સુભગશ્ચૈવ સૌભાગ્યં સગરાન્વયઃ ॥ ૧૪૩॥

સીતાપતિઃ સસીતશ્ચ સાત્વતઃ સાત્વતામ્પતિઃ ।
હરિર્હલી હલશ્ચૈવ હર-કોદણ્ડ-ખણ્ડનઃ ॥ ૧૪૪॥

હુઙ્કારધ્વનિપૂરશ્ચ હુઙ્કારધ્વનિસમ્ભવઃ ।
હર્તા હરો હરાત્મા ચ હારભૂષણભૂષિતઃ ॥ ૧૪૫॥

હરકાર્મુકભઙ્ક્તા ચ હરપૂજાપરાયણઃ ।
ક્ષોણીશઃ ક્ષિતિભુગ્ ક્ષોણીનેતા ચૈવ ક્ષમાપરઃ ॥ ૧૪૬॥

ક્ષમાશીલઃ ક્ષમાયુક્તઃ ક્ષોદી ક્ષોદવિમોચનઃ ।
ક્ષેમઙ્કરસ્તથા ક્ષેમદાયકો જ્ઞાનદાયકઃ ॥ ૧૪૭॥

ફલશ્રુતિઃ -
નામ્નામેતત્સહસ્રં તુ શ્રીરામસ્ય જગત્પ્રભોઃ ।
રુદ્રયામલતન્ત્રેऽસ્મિન્ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧૪૮॥

શ્રીગૌર્યૈ શ્રાવિતં સ્તોત્રં ભક્ત્યા શ્રીશસ્મૃના સ્વયમ્ ।
રામસાયુજ્યલક્ષ્મીકં સર્વસૌખ્યકરં નૃણામ્ ॥

પઠન્ શ ૃણ્વન્ ગૃણન્ વાપિ બ્રહ્મભૂયાય કલ્પતે ॥ ૧૪૯॥

શ્રીરામનામ્ના પરમં સહસ્રકં પાપાપહં પુણ્યસુખાવહં શુભમ્ ।
ભક્તિપ્રદં ભક્તજનૈકપાલકં સ્ત્રીપુત્રપૌત્રપ્રદમિષ્ટદાયકમ્ ॥ ૧૫૦॥

॥ ઇતિ શ્રીરામસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ ૐ તત્સત્ શ્રીસીતારામચન્દ્રાર્પણમસ્તુ ॥

Proofread by PSA Easwaran

*Shri Rama SahasranAma Stotra*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*